शिवमहिम्नस्तोत्र
बहुरूप गर्भ

शिवमहिम्नस्तोत्र

मूल्यः 10/-

शिव-महिम्न-स्तोत्रम्

पुष्प-दन्त उवाच

महिम्नः पारं-ते परम-विदुषो यद्य-सदृशी
स्तुतिर्-ब्रह्मादीनाम्-अपि तद-वसन्नाः-त्वयि गिरः ।
अथा-वाच्यः सर्व : स्वमति-परिणामा-वधि गृणन्
ममा-प्येष-स्तोत्रे हर ! निर्-अपवादः परिकरः (1)

अतीतः पन्थानं तव च महिमा वाङ्-मनसयोर्-
अतत्-व्यावृत्त्या यं चकितम्-अभिधते श्रुतिर्-अपि ।
स कस्य-स्तोतव्यः कतिधि-गुणः कस्य विषय :
पदे-त्व-र्वाचीने पतति न मनः कस्य न वचः (2)

मधु-स्फीता वाचः परमम्-अमृतं निर्मितवतः
तव ब्रह्मन्-किं वाक्-अपि सुरगुरो-र्विस्मय-पदम् ।
मम त्वेतां वाणीं गुण-कथन-पुण्येन भवतः
पुनामी-त्यर्थेऽस्मिन्-पुर-मथन ! बुद्धि-र्व्यवसिता (3)

तवैश्वर्यं-यत्-तत्-जगत्-उदय-रक्षा-प्रलय-कृत्
त्रयी-वस्तु व्यस्तं तिसृषु गुण-भिन्नासु तनुषु ।
अभव्यानाम्-अस्मिन्-वरद रमणीयाम्-अरमणीम्
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः (4)

किम्-ईहः किं कायः स खुल किमुपायः-त्रिभुवनम्
किम्-आधारो धाता सृजति किम्-उपादन-इति च

अतर्क्यै-श्वर्ये त्व-य्यन-वसर दुःस्थो-हतधियः
कुतर्कोऽयं कान्-चित्-मुखरयति मोहाय जगतः (5)
अजन्मानो-लोकाः किम्-अवयव-वन्तोपि जगताम्
अधिष्ठातारं किं भव-विधिर्-अनादृत्य भवति ।
अनीशो वा कुर्यात् भुवन-जनने कः परिकरो
यतो मन्दाः-त्वां प्रत्यमरवर ! संशोरत इमे (6)
त्रयी सांख्यं योगः पशुमति-मतं वैष्णवम्-इति
प्रभिन्ने प्रस्थाने परम्-इदम-अदः पथ्यम्-इति-च ।
रुचीनां वैचित्र्यात्-ऋजु-कुटिल-नाना-पथ जुषाम्
नृणाम्-एको गम्यः-त्वमसि पयसाम्-अर्णव इव (7)
महोक्षः खट्वांगं परशुर्-अजिनं भस्म फणिनः
कपालं चे ते यत्-तव वरद । तन्त्रोपरणम् ।
सुराः-तां ताम्-ऋद्धिं दधति तु भवत्-भ्रूप्रणिहितां
नहि स्वात्मा रामं विषय-मृग-तृष्णा भ्रमयति (8)
ध्रुवं कश्चित्-सर्वं सकलम्-अपरस्त्व-ध्रुवम्-इदं
परो ध्रौव्या ध्रौव्ये जगति गदति व्यस्त विषये ।
समस्ते प्ये-तिस्मन्-पुरमथन ! तै र्विस्मित इव
स्तुवन्-जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता (9)
तवै-श्वर्यं यत्नात् यत्-उपरि विरंचि-हरिर्-अधः
परिच्छेत्तुं यातौ-अनलम्-अनलस्कन्ध-व पुषः ।

ततो भक्ति-श्रद्धा-भर-गुरु-गृणत्-भ्यां गिरिश ! यत
स्वयं तस्थे ताभ्यां तव किम्-अनुवृत्ति-र्न फलति (10)
अयत्नात्-आपद्य त्रिभुवनम्-अवैर-व्यतिकरम्
दशास्यो यत्-बाहून-अभृत रण-कण्डू-पर-वशान्
शिरः पद्म-श्रेणि-रचित-चरणाम्भोरुह-बलेः
स्थिरायास्त्वत्-भक्तेः-त्रिपुर-हर ! विस्फूर्जितम्-इदम् (11)
अमुष्य त्वत्-सेवा-सम्-अधिगत-सारं भुजवनम्
बलात्-कैलासेपि त्वत्-अधि-वसितौ विक्रम-यतः ।
अलभ्यः-पाताले-प्यलस-चलितांगुष्ठ-शिरसि
प्रतिष्ठा-त्वयासीत्-ध्रुवम्-उपचितो मुह्यति खलः (12)
यत्-ऋद्धिं सुत्राम्णो वरद ! परमोचैर्-अपि सतीम्
अधश्चक्रे बाणः परिजन-विधेय-त्रिभुवनः ।
न तत्-चित्रं तस्मिन् वरि-वसितरि त्वत्-चरणयोः
न कस्या-प्युन्नत्यै भवति शिर-सस्त्वय्य-वनतिः (13)
अकाण्ड-ब्रह्माण्ड-क्षय-चकित-देवा-सुर-कृपा
विधेयस्यासीत्-यस्त्रिनयन विषं संहृतवतः ।
स कल्माषः कण्ठे तव न कुरुते न श्रयम्-अहो
विकारोपि श्लाध्यो भुवन-भय-भंग-व्यसनिनः (14)
असिद्धार्था नैव क्वचित्-अपि सदेवा-सुर-नरे
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः ।

स पश्यन्-ईश त्वाम्-इतर-सुर-साधारणम्-अभूत
स्मरः स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः (15)
मही पादाघातात्-व्रजति सहसा संशयपदम्
पदं विष्णोर्-भ्राम्यत्-भुज-परिघ-रुग्ण-ग्रह-गणम् ।
मुहुर्-द्यौर्-दौस्थ्यं यात्यनि-भृत-जटा-ताडित-तटा
जगत्-रक्षायै त्वं नटसि ननु वामैव विभुता (16)
वियत्-व्यापी तारागण-गुणित-फेनोत्-गम-रुचिः
प्रवाहो वारां यः पृषत-लघु-दृष्टः शिरसि-ते ।
जगत्-द्वीपाकारं जलधि-वलयं तेन कृतमि-
त्यनेनैव-वोन्नेयं धृत-महिम दिव्यं तव वपुः (17)
रथः क्षोणी यन्ता शतधृतिर्-अगेन्द्रो धनु-रथो
रथांगे चन्द्रार्कौ रथ-चरण-पाणिः शर इति ।
दिधक्षोस्ते कोयं त्रिपुर-तृणम्-आडम्बर-विधिः
विधेयैः क्रीडन्त्यो न खलु-परतन्त्राः प्रभुधियः (18)
हरिस्ते साहस्रं कमल-बलिम्-आधाय पदयोः
यत्-एकोने तस्मिन्-निजम्-उदहरत्-नेत्र-कमलम् ।
गतो भक्त्युद्रेकः परिणतिम्-असौ च-क्रवपुषा
त्रयाणां रक्षायै त्रिपुर-हर ! जागर्ति जगताम् (19)
क्रियादक्षो दक्षः क्रतुपतिर्-अधीशस्तनु-भृताम्-
त्रृषीणाम्-आर्त्विज्यं शरणद ! सदस्याःसुरगणाः
क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ।

अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्मसुजनः ।२

कृतुभ्रंशस्त्वतः क्रतुफल-विधान-व्यसनिनो
ध्रुवं-कर्तुः श्रद्धा-विधुरम्-अभिचाराय हि मखाः (21)
प्रजानाथं नाथ ! प्रसभम्-भिकं स्वां दुहितरं
गतं रोहित्-भूतां रिर-मयिषम्-त्र्यृष्यस्य वपुषा
धनुष्पाणे-र्यातं दिवम्-अपि सपत्रा-कृतम्-अमुम्
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याध-रभसः (22)
अपूर्वं लावण्यं विवसन-तनोस्ते-विमर्शतां
मुनीनां दाराणां समजनि सकोप-व्यतिकरः
यतो-भग्ने गुह्येसकृत्-अपि सपर्यां विदधतां
ध्रुवं-मोक्षोऽश्लीलं किम्-अपि पुरुषार्थ-प्रसवि ते (23)
स्वलावण्या-शंसा-धृत-धनुषम्-अह्नाय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुर-मथन ! पुष्पायुधम्-अपि ।
यदि स्त्रैणं-देवी यम-निरत-देहार्ध-घटनात्
अवैति-त्वाम्-अद्धा-वत-वरद ! मुग्धा युवतयः (24)
श्मशानेष्वा-क्रीडा स्मर-हर !पिशाचाः सहचराः
चिता-भस्मा-लेपः स्रृक्-अपि नृकरोटी परि-करः ।
अमंगल्यं शीलं तव भवतु नामैवम्-अखिलं
तथापि स्मर्तॄणां वरद ! परमं मंगलम्-असि (25)
मनः प्रत्यक्-चित्ते सविधम्-अभिधायात्त-मरुतः प्रहष्यत-
रोमाणः प्रमद-सलिलोत्-संगित-दृशः ।

यदा-लोक्या-ह्लादं ह्द इव निमज्ज्या-मृतमये
दध-त्यन्त-स्तत्त्वं किम्-अपि यमिनस्तत्-किल-भवान् (26)
त्वम्-अर्क-स्त्वं सोम-स्त्वम्-असि पवन स्त्वं हुतवहः
त्वम्-आप-स्त्वं व्योम-त्वमु-धरणिर्-आत्मा त्वमिति च ।
परि-च्छिन्नामेवं त्वयि परिणता बिभ्रति गिरम्
न विद्मस्तत्-तत्त्वं वयमिह तु यत्-त्वं न भवसि (27)
त्रयीं तिस्रो वृत्ती-स्त्रिभुवनम्-अथो त्रीन्-अपि सुरान्
अकाराद्यै-वर्णै-स्त्रिभिर्-अभि--दधत्तीर्ण-विकृति ।
तुरीयं ते धाम ध्वनिभिर्-अवरुन्धानम्-अणुभिः
समस्त व्यस्तं त्वां शरणद ! गृणा-त्योमिति-पदम् (28)
भवः शर्वो रुद्रः पशुपतिर्-अथोग्रः सह-महान्
तथा भीमेशानौ-इति यत्-अभिधाना-ष्टकम्-इदम्
अमुष्मिन् प्रत्येकं प्रविचरति देव श्रुतिर्-अपि
प्रिया-यास्मै-धाम्ने-प्रणिहित-नमस्योस्मि भवते (29)
वपुष्प्राद्-र्भावात्-अनुमितम्-इदं जन्मनि पुरा
पुरारे ! नैवाहं क्वचित्-अपि भवन्तं प्रणतवान् ।
नमन्-मुक्तः सम्प्र-त्यतनुर्-अहम-अग्रे-प्यनतिमान्
महेश ! क्षन्तव्यं तत्-इदम्-अपराध- द्वयम्-अपि (30)
नमो नेदिष्ठाय प्रियदव ! दविष्ठाय च नमः
नमः क्षोदिष्ठाय स्मर-हर ! महिष्ठाय च नमः ।

नमो वर्षिष्ठाय त्रिनयन ! यविष्ठाय च नमः
नमः सर्वस्मै ते तत्-इदम्-इति शर्वाय च नमः (31)
बहल-रजसे विश्वो-त्पत्तै भवाय नमो नमः
प्रबल-तमसे तत्-संहारे-हराय नमोनमः ।
जनसुख-कृते सत्त्वो-द्रिक्तौ मृडाय नमोनमः
प्रमहसि पदे नि-स्त्रैगुण्ये-शिवाय नमोनमः (32)
कृश-परिणति चेतः क्लेश-वश्यं क्वचेदम्
क्व च तव गुण-सीमो-ल्लंघिनी शश्वत्-ऋद्धिः ।
इति चकितम्-अमन्दीकृत्य मां भक्तिराधात्
वरद ! चरण्योरेस्ते वाक्य-पुष्पोप-हारम् (33)
श्री पुष्पदन्त-मुखं-पंकज निर्गतिन
स्तोत्रेण किल्विष-हरेण हर-प्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपति-र्महिशः (34)
इत्येषा वाङ्मयी पूजा श्रीमत्-शंकर-पादयोः
अर्पिता तेन मे देवः प्रीयतां च सदाशिवः (35)

ॐ नमः शम्भवाय च, मयोभवाय, नमः शंकराय च,
मयस्करायच नमः शिवाय च शिवतराय च

काम

क्लेश — 5 kinds   Patanjali

1. Ignorance   2. Egoism
अज्ञान   अहंकार

बहुरूप गर्भ

3. Attachment   4. Aversion
आसक्ती   अरुची
नास्तिक भाव

5. Clin longevity
अजर

ॐ नमः स्वच्छन्दभैरवाय

ब्रह्मादि-कारणातीतं स्व-शक्त्या-नन्द-निर्भरम्
नमामि परमेशानं, स्वच्छन्दं वीर-नायकम् (1)
कैलास-शिखरासीनं, देव-देवं जगत्-गुरुम् ।
पप्रच्छ प्रणता देवी, भैरवं विगता-मयम् (2)

श्री देवी-उवाच

प्रायश्चित्तेषु सर्वेषु, समयो-लंघनेषु च ।
महाभयेषु घोरेषु, तीब्रो-पद्रव-भूमिषु (3)
छिद्र-स्थानेषु सर्वेषु, सत्-उपायं वद प्रभो ।
येनायासेन रहितो, निर्दोषश्च भवेत्-नरः (4)

श्री भैरव-उवाच

शृणु देवि परं गुह्यं, रहस्यं परमाद्भुतम् ।
सर्व-पाप-प्रशमनं, सर्व-दुःख-निवा-रणम् (5)
प्रायश्चित्तेषु सर्वेषु, तीव्रे-ष्वपि विमोचनम् ।
सर्व-छिद्रा-पहरणं, सर्वा-र्ति-विनिवारकम् (6)
समयो-लंघने घोरे-जपात्-एव-विमोचनम् ।
भोग-मोक्ष-प्रदं देवि, सर्व-सिद्धि-फल-प्रदम् (7)
शत-जाप्येन शुद्ध्यन्ति, महा-पातकिनोपि ये ।
तत्-अर्ध पातकं हन्ति, तत्पादे-नोप-पातकम् (8)
कायिकं वाचकं चैव, मानसं स्पर्श-दोषजम्
प्रमादात्-इच्छया वापि, सकृत्-जाप्येन-शुद्ध्यति (9)

यागारम्भे च यागान्ते, पठितव्यं प्रयत्नतः ।
नित्यें नैमित्तिके काम्ये, परस्या-त्मनो-पिवा (10)
नि-श्छिद्र-करणं प्रोक्तं, स्वभाव-परिपूरणम् ।
द्रव्यहीने मन्त्रहीने, यज्ञ-योग-विवर्जिते (11)
भक्ति-श्रद्धा-विरहिते, शुद्धि-शून्ये विशेषतः ।
मानो-विक्षेप-दोषे च, विलोपे पशु-वीक्षते (12)
विधिहीने प्रमादे च, जपतव्यं सर्व-कर्मसु ।
नातः परतरो मन्त्रो नातः परतरा स्तुतिः (13)
नातः परतरा काचित्-सम्यक् प्रत्यं-गिरा प्रिये ।
इयं समय-विद्यानां, राज-राजेश्वरी-श्वरि (14)
परमा-प्यायनं देवि, भैरवस्य प्रकीर्तितम् ।
प्रीणनं सर्व-देवानां, सर्व-सौभाग्य-वर्धनम् (15)
स्तवराजम्-इमं पुण्यं, श्रृण्व-ष्वा-वहिता प्रिये(16)
अस्य श्रीबहुरूप-भट्टारक-स्तोत्रस्य वामदेव-ऋषिः,
अनुष्टुप्-छन्दः, श्री बहु-रूप-भट्टारको देवता,
आत्मनोवाङ्-मनः कायो-पार्जित-पाप-निवार-णार्थ
चतुर्वर्ग-सिद्धय्र्थे पाठे-विनियोगः ।।
(अघोर-मन्त्रेण न्यासं कृत्वा प्राणायामः)

अथ ध्यानम्

वामे खेटक-पाश-शारङ्ग विलसत्-
-दण्डं च वीणांटिके ।
बिभ्राणं ध्वज-मुद्गरौ स्वनिभदे
व्यंकं कुठारं करे ।
दक्षैस्त्यङ्कुश-कन्दलेषु-डमरून्
वज्र-त्रिशूलाभयान्
रुद्रस्थं शरवक्त्रम्-इन्दुधवलं
स्वच्छन्द-नाथं स्तुमः ।।

ॐ बहुरूपाय विद्महे कोटराक्षाय धीमहि तन्नोघोरः
प्रचोदयात् ।।

ॐ अघोरेभ्योऽथ घोरेभ्यो, घोर-घोर-तरेभ्यश्च,
सर्वतः शर्व सर्वेभ्यो नमस्ते रुद्ररूपेभ्यः (108)

ॐ नमः परमा-काश, शायिने परमात्मने ।
शिवाय पर-संशान्त, निरानन्द-पदायते (1)
अवाच्याया-प्रमेयाय, प्रमात्रे विश्व-हेतवे ।
महा-सामान्य-रूपाय, सत्ता-मात्रैकरूपिणे (2)
घोषादि-दशधा-शब्द, बीज-भूताय शम्भवे ।
नमः शान्तोग्र-घोरादि, मन्त्र-सन्दर्भ-गर्भिणे (3)
रे-वती-संग-विस्रम्भ, समाश्लेष-विलासिने ।
नमः सम-रसा-स्वाद, परानन्दोप-भोगिने (4)

भोग-पाणे नमस्तुभ्यं, योगीशैः पूजितात्मने ।
द्वय-निर्दलनो-द्योग, समुल्ला-सितमूर्तये (5)
थरत्-प्रसर-विक्षोभ, विसृष्टा-खिल-जन्तवे ।
नमो माया-स्वरूपाय, स्थाणवे परमेष्ठिने (6)
घोर-संसार-संभोग, दायिने स्थिति-कारिणे ।
कलादि-क्षिति-पर्यन्त, पालिने विभवे नमः (7)
रेहणाय महामोह, ध्वान्त-विध्वंस हेतवे ।
हृदयाम्भोज-संकोच, भेदिने शिव-भानवे (8)
भोग-मोक्ष-फल-प्राप्ति, हेतु-योग-विधायिने ।
नमः परम-निर्वाण, दायिने चन्द्र-मौलये (9)
घोषाय सर्व-मन्त्राणां, सर्व-वाङ्मय-मूर्तये ।
नमः सर्वाय शर्वाय, सर्व-पाशोप-हारिणे (10)
रवणाय रवान्ताय, नमस्ते राव-राविणे
नित्याय सुप्रबुद्धाय, सर्वान्तर-तमाय-ते (11)
घोषाय पर-नादान्त-श्चराय खचरायते ।
नमो-वाक्-पतये तुभ्यं, भवाय भव-भेदिने (12)
रमणाय रतीशांग-दाहिने चित्र-कर्मणे ।
नमः शैल-सुता-भर्त्रे, विश्वकर्त्रे-महात्मने (13)
नमः पार-प्रतिष्ठाय, सर्वान्त-पदगाय ते ।
नमः समस्त-तत्त्वाध्व, व्यापिने चित्-स्वरूपिणे (14)

रेवत्-वराय रुद्राय, नमस्ते रूप-रूपिणे ।
परा-पर-परिस्पन्द, मन्दिराय नमोनमः (15)
भरिताखिल-विश्वाय, योगि-गम्याय योगिने ।
नमः सर्वे-श्वरे-शाय, महाहंसाय शम्भवे (16)
चर्य्याय चर्चनीयाय, चर्चकाय चरायते ।
रवीन्दु-सन्धि-संस्थाय, महा-चक्रेश ते नमः (17)
सर्वानु-स्यूत-रूपाय, सर्वा-छादक-शक्तये ।
सर्व-भक्षाय शर्वाय, नमस्ते सर्व-वेदिने (18)
रम्याय वल्लभाक्रान्त, देहार्धाय वियोगिने ।
नमः प्रपन्न-दुष्प्राप, सौभाग्य-फलदायिने (19)
तन्मेहशाय तत्त्वार्थ-वेदिने भवभेदिने ।
महा-भैरव-नाथाय भक्ति-गम्याय ते नमः (20)
शक्ति-गर्भ-प्रबोधाय, शरण्याया-शरीरिणे ।
शान्ति-पुष्ट्यादि-साध्यार्थ, साधकाय नमोस्तुते (21)
रवत्-कुण्डलिनी-गर्भ, प्रबोध-प्राप्त-शक्तये ।
उत्स्फोटना-पटु-प्रौढ, परमाक्षर-मूर्तये (22)
समस्त-व्यस्त-संग्रस्त, रश्मि-जालोदरा-त्मने ।
नमस्तुभ्यं महामीन-रूपिणे विश्व-गर्भिणे (23)
रेवारणि-समुद्भूत, वह्नि-ज्वालाव-भासिने ।
घनीभूत-विकल्पात्म, विश्व-बन्ध-विलापिने (24)

भोगिनी-स्यन्दना-रूढि, प्रौढिमा-लब्ध-गर्विणे ।
नमस्ते सर्व-भक्ष्याय, परमा-मृत-लाभिने (25)
णफ-कोटि-समावेश, भरिता-खिल-सृष्टये ।
नमः शक्ति-शरीराय, कोटि-द्वितय-संगिने (26)
महा-मोह-मला-क्रान्त, जीववर्गाव-बोधिनी
महेश्वराय जगतां, नमः कारण-बन्धवे (27)
स्तेनोन्-मूलन-दक्षैक, स्मृतये विश्व-मूर्तये ।
नमस्तेस्तु महादेव, नाम्ने पर-स्वधा-त्मने
रूक्-द्राविणे महावीर्य, रुरुवंश-विनाशिने ।
रुद्राय द्राविता-शेष, बन्धनाय नमोस्तु-ते (29)
द्रवत्-पर-रसा-स्वाद, चर्वणो-द्युक्त-शक्तये ।
नमः-त्रिदश-पूज्याय, सर्वकारण-हेतवे (30)
रूपातीत नमस्तुभ्यं, नमस्ते बहुरूपिणे ।
त्र्यम्बकाय त्रिधामान्त-श्चारिणे च त्रिचक्षुषे (31)
पेश-लोपाय-लभ्याय, भक्ति-भाजां महात्मनाम् ।
दुर्लभाय मलाक्रान्त, चेतसां तु नमोनमः (32)
भवप्रदाय दुष्टानां, भवाय भव-भेदिने
भव्यानां तत्-मयानां तु, सर्वदाय नमोनमः (33)
अणूनां मुक्तये घोर, घोर संसार-दायिने ।
घोराति-घोर-मूढानां, तिरस्क-र्त्रे नमो नमः (34)

स्तोत्र

इत्येवं स्तोत्र-राजेशं, महाभैरव-भाषितम् ।
योगिनीनां परं सारं, न दद्यात्-यस्य कस्यचित् (1)
अदीक्षिते शठे क्रूरे, निःसत्ये शुचि-वर्जिते
नास्तिके च खले मूर्खे, प्रमत्ते विप्लुतेऽलसे (2)
गुरु-शास्त्र-सदाचार, दूषके कलह-प्रिये
निन्दके चुम्भके क्षुद्रे-ऽसमयज्ञे च दांभिके (3)
दाक्षिण्य रहिते पापे, धर्म-हीने च गर्विते ।
भक्ति-युक्ते पदातव्यं, न देयं पर-दीक्षिते (4)
पशूनां सन्निधौ देवि, नोच्चार्यं सर्वथा क्वचित्
अस्य वै-स्मृति-मात्रेण, विघ्ना नश्यन्त्य-नेकशः (5)
गुह्यका यातु-धानाश्च, वेताला राक्षसादयः ।
डाकि-न्यश्च पिशाचाश्च क्रूर-सत्त्वाश्च पूतनाः (6)
नश्यन्ति सर्वे पठित-स्तोत्रस्या-स्य प्रभावतः ।
खेचरी, भूचरी, चैव, डाकिनी शाकिनी तथा (7)
ये चान्ये बहुधा भूता, दुष्ट-सत्त्वा भयानकाः ।
व्याधि-दौर्भिक्ष-दौर्भाग्य, मारी-मोह-विषादयः (8)
गज-व्याघ्राश्च ये घोरा, पलायन्ते दिशोदश ।
सर्वे दुष्टाः प्रणश्यन्ति, चेत्याज्ञा पारमेश्वरी (9)

इति श्रीललितस्वच्छन्दे

बहुरूप-गर्भ-स्तोत्र-राजः सम्पूर्णः

= ابو بصیر

= ابو ماں

= ابو [illegible]

[illegible]

हमारे सभी प्रकाशन तथा प्रेमनाथ शास्त्री की ज़बान से भरे हुये कैसट्स निम्नलिखित स्थानों से मिल सकते हैं।

D.P.B. PUBLICATION
110, Chawri Bazar, Delhi
Ph : 3273220

तनेजा इल्कट्रॉनिक्स एण्ड टैन्ट हाऊस
अमर कालोनी, लाजपतनगर, देहली
फोन : 6429046

SH. S.N. RAINA
303/9 Sect. Faridabad
Ph : 8-282805, 8-282806, 8-282807

SH. C.L. KAUL
104, Mukti Kalyan Complex
Yari-Road, Andheri (West) Mumbai-400061
Ph : 6293887, 6295479

विजयेश्वर धार्मिक पुस्तक भण्डार
तालाब तिलो जम्मू, फोन : 555763

J.K. BOOK SHOP
Talab Tillo Jammu
Ph : 554522 (PP)

यूनिवर्सल न्यूज़ एजेन्सी
मुकर्जी बाजार, उधमपुर